# Shri GAnapati Mangala Malika Stotram

# શ્રીગણપતિમઙ્ગલમાલિકાસ્તોત્રમ્

## Document Information

Text title : gaNapatimangalamAlikAstotram

File name : gaNapatimangalamAlikAstotram.itx

Category : ganesha, mangala

Location : doc_ganesha

Transliterated by : Shree Devi Kumar

Proofread by : Shree Devi Kumar, PSA Easwaran

Latest update : August 25, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# શ્રીગણપતિમઙ્ગલમાલિકાસ્તોત્રમ્

શ્રીકણ્ઠપ્રેમપુત્રાય ગૌરીવામાઙ્ગવાસિને ।
દ્વાત્રિંશદ્રૂપયુક્તાય શ્રીગણેશાય મઙ્ગલમ્ ॥ ૧॥

આદિપૂજ્યાય દેવાય દન્તમોદકધારિણે ।
વલ્લભાપ્રાણકાન્તાય શ્રીગણેશાય મઙ્ગલમ્ ॥ ૨॥

લમ્બોદરાય શાન્તાય ચન્દ્રગર્વાપહારિણે ।
ગજાનનાય પ્રભવે શ્રીગણેશાય મઙ્ગલમ્ ॥ ૩॥

પઞ્ચહસ્તાય વન્દ્યાય પાશાઙ્કુશધરાય ચ ।
શ્રીમતે ગજકર્ણાય શ્રીગણેશાય મઙ્ગલમ્ ॥ ૪॥

દ્વૈમાતુરાય બાલાય હેરમ્બાય મહાત્મને ।
વિકટાયાખુવાહાય શ્રીગણેશાય મઙ્ગલમ્ ॥ ૫॥

પૃષ્ણિશૃઙ્ગાયાજિતાય ક્ષિપ્રાભીષ્ટાર્થદાયિને ।
સિદ્ધિબુદ્ધિપ્રમોદાય શ્રીગણેશાય મઙ્ગલમ્ ॥ ૬॥

વિલમ્બિયજ્ઞસૂત્રાય સર્વવિઘ્નનિવારિણે ।
દૂર્વાદલસુપૂજ્યાય શ્રીગણેશાય મઙ્ગલમ્ ॥ ૭॥

મહાકાયાય ભીમાય મહાસેનાગ્રજન્મને ।
ત્રિપુરારી વરો ધાત્રે શ્રીગણેશાય મઙ્ગલમ્ ॥ ૮॥

સિન્દૂરરમ્યવર્ણાય નાગબદ્ધોદરાય ચ ।
આમોદાય પ્રમોદાય શ્રીગણેશાય મઙ્ગલમ્ ॥ ૯॥

વિઘ્નકર્ત્રે દુર્મુખાય વિઘ્નહર્ત્રે શિવાત્મને । var કષ્ટકર્ત્રે કષ્ટહર્ત્રે
સુમુખાયૈકદન્તાય શ્રીગણેશાય મઙ્ગલમ્ ॥ ૧૦॥

સમસ્તગણનાથાય વિષ્ણવે ધૂમકેતવે ।
ત્ર્યક્ષાય ભાલચન્દ્રાય શ્રીગણેશાય મઙ્ગલમ્ ॥ ૧૧॥

ચતુર્થીશાય માન્યાય સર્વવિદ્યાપ્રદાયિને ।
વક્રતુણ્ડાય કુબ્જાય શ્રીગણેશાય મઙ્ગલમ્ ॥ ૧૨॥

તુણ્ડિને કપિલાક્ષાય શ્રેષ્ઠાય ઋણહારિણે ।
ઉદ્દણ્ડોદ્દણ્ડરૂપાય શ્રીગણેશાય મઙ્ગલમ્ ॥ ૧૩॥

કષ્ટહર્ત્રે દ્વિદેહાય ભક્તેષ્ટજયદાયિને ।
વિનાયકાય વિભવે શ્રીગણેશાય મઙ્ગલમ્ ॥ ૧૪॥

સચ્ચિદાનન્દરૂપાય નિર્ગુણાય ગુણાત્મને ।
વટવે લોકગુરવે શ્રીગણેશાય મઙ્ગલમ્ ॥ ૧૫॥

શ્રીચામુણ્ડાસુપુત્રાય પ્રસન્નવદનાય ચ ।
શ્રીરાજરાજસેવ્યાય શ્રીગણેશાય મઙ્ગલમ્ ॥ ૧૬॥

શ્રીચામુણ્ડાકૃપાપાત્ર શ્રીકૃષ્ણેન્દ્રવિનિર્મિતામ્ ।
વિભૂતિમાતૃકારમ્યાં કલ્યાણૈશ્વર્યદાયિનીમ્ ॥ ૧૭॥

શ્રીમહાગણનાથસ્ય શુભાં મઙ્ગલમાલિકામ્ ।
યઃ પઠેત્ સતતં વાણીં લક્ષ્મીં સિદ્ધિમવાપ્નુયાત્ ॥ ૧૮॥

ઇતિ શ્રીકૃષ્ણેન્દ્રરચિતં શ્રીગણપતિમઙ્ગલમાલિકાસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded by Shree Devi Kumar
Proofread by Shree Devi Kumar, PSA Easwaran

*Shri GAnapati Mangala Malika Stotram*
pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*